श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ घोषशान्तिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

**श्रीः**

**श्रीमते रामानुजाय नमः**

**श्रीमते निगमान्तमहादेशिकाय नमः**

# ॥ घोषशान्तिः ॥

शं नो॒ वातः॑ पवतां मात॒रिश्वा॒
  शं न॑स्तपतु॒ सूर्यः॑।
अहा॑नि॒ शं भ॑वन्तु न॒श्शग्ं
  रात्रि॒ः प्रति॑ धीयताम्।
शमु॒षा नो॒ व्यु॑च्छतु॒
  शमा॑दि॒त्य उदे॑तु नः।
शि॒वा न॒श्शन्त॑मा भव
  सुमृडी॒का सर॑स्वति।
मा ते॒ व्यो॑म सं॒दृशि॑।
इडा॑यै॒ वास्त्व॑सि वास्तु॒मद्वा᳚स्तु॒मन्तो॑
  भूयास्म॒ मावास्तो᳚श्छिथ्स्मह्यवा॒स्तुस्स
  भू॑या॒द्यो᳚ऽस्मान्द्वेष्टि॒ यं च॑ व॒यं द्वि॒ष्मः।
प्र॒ति॒ष्ठाऽसि॑ प्रति॒ष्ठाव॑न्तो भूयास्म॒ मा
  प्र॑ति॒ष्ठाया᳚श्छिथ्स्मह्यप्रति॒ष्ठस्स
  भू॑या॒द्यो᳚ऽस्मान्द्वेष्टि॒ यं च॑ व॒यं द्वि॒ष्मः।
आ वा॑त वाहि भेष॒जं वि वा॑तवाहि॒ यद्रपः॑।
त्वग्ं हि वि॒श्वभे॑षजो दे॒वाना᳚ं दूत ईय॑से।

द्वावि॒मौ वातौ॑ वात॒ आसिन्धो॒राप॑रा॒वत॑ः।
दक्षं᳚ मे अ॒न्य आ॒वातु॒ परा॒ऽन्यो वा॑तु॒ यद्रप॑ः।
यद॒दो वा॑त ते गृ॒हे॑ऽमृत॑स्य नि॒धिर्॒ हि॒तः।
ततो॑ नो देहि जी॒वसे॒ ततो॑ नो धेहि भेष॒जम्।
ततो॑ नो॒ मह॒ आव॑ह॒ वात॒ आवा॑तु भेष॒जम्।
श॒म्भूर्म॑यो॒भूर्नो॑ हृ॒दे प्रण॒ आयू॑ग्ं॒षि तारिषत्।
इन्द्र॑स्य गृ॒हो॑ऽसि॒ तं त्वा॒ प्रप॑द्ये॒ सगु॒स्साश्व॑ः।
स॒ह यन्मे॒ अस्ति॒ तेन॑।
भूः प्रप॑द्ये॒ भुव॒ः प्रप॑द्ये॒ सुव॒ः प्रप॑द्ये॒
  भूर्भुव॒स्सुव॒ः प्रप॑द्ये वा॒युं
  प्रप॒द्येऽना᳚र्तां दे॒वता॒ं
  प्रप॒द्येऽश्मा॑नमाख॒णं
  प्रप॑द्ये प्र॒जाप॑तेर्ब्रह्मको॒शं
  ब्रह्म॒प्रप॑द्य॒ ओं प्रप॑द्ये।
अ॒न्तरि॑क्षं म उ॒र्व᳚न्तरं᳚ बृ॒हद॒ग्नय॒ः
  पर्व॑ताश्च॒ यया॒ वात॑ः स्व॒स्त्या
  स्व॑स्ति॒मान्तया᳚ स्व॒स्त्या
  स्व॑स्ति॒मान॑सानि।
प्राणा॑पानौ मृ॒त्योर्मा᳚ पात॒ं
  प्राणा॑पानौ॒ मा मा॑ हासिष्ट॒ं
  मयि॑ मे॒धां मयि॑ प्र॒जां

मय्य॒ग्निस्तेजो॑ दधातु॒
मयि॑ मे॒धां मयि॑ प्र॒जां
मयीन्द्र॑ इन्द्रि॒यं द॑धातु॒
मयि॑ मे॒धां मयि॑ प्र॒जां
मयि॒ सूर्यो॒ भ्राजो॑ दधातु।
द्युभिर॒क्तुभि॒ः परि॑पातम॒स्मानरि॑ष्टेभिरश्विना॒
सौभ॑गेभिः।
तन्नो॑ मि॒त्रो वरु॑णो मामहन्ता॒मदि॑ति॒ः
सिन्धु॑ः पृथि॒वी उ॒त द्यौः।
कया॑ नश्चि॒त्र आ भु॑वदू॒ती स॒दावृ॑ध॒स्सखा॑।
कया॒ शचि॑ष्ठयाऽऽवृ॒ता।
कस्त्वा॑ स॒त्यो मदा॑नां॒
मग्ं॑हिष्ठो मथ्स॒दन्ध॑सः।
दृ॒ढा चि॑दा॒रुजे॒ वसु॑।
अ॒भीषु॒णस्सखी॑नामवि॒ता ज॑रितॄ॒णाम्।
श॒तं भ॑वास्यू॒तिभि॑ः।
वय॑स्सुप॒र्णा उप॑सेदु॒रिन्द्र॑ं
प्रि॒यमे॑धा॒ ऋष॑यो॒ नाध॑मानाः।
अप॑ध्वा॒न्तमू॑र्णु॒हि पू॒र्धि
चक्षु॑र्मु॒मु॒ग्ध्य॑स्मान्नि॒धये॑ऽवब॒द्धान्।
शं नो॑ दे॒वीर॒भिष्ट॑य॒ आपो॑ भवन्तु पी॒तये॑।

शं योर॒भिस्रं॑वन्तु नः।
ईशा॑ना॒ वार्या॑णां॒ क्षयं॑न्तीश्चर्ष॒णी॒नाम्।
अ॒पो या॑चामि भेष॒जम्।
सु॒मि॒त्रा न॒ आप॒ ओष॑धयः सन्तु दु॒र्मि॒त्रास्तस्मै॑
 भूयासु॒र्यो॑ऽस्मान्द्वेष्टि॒ यं च॑ व॒यं द्वि॒ष्मः।
आपो॒ हिष्ठा म॑यो॒भुव॒स्ता न॑ ऊ॒र्जे द॑धातन।
म॒हेरणा॑य॒ चक्ष॑से।
यो व॑ः शि॒वत॑मो॒ रस॒स्तस्य॑ भजयते॒ ह नः॑।
उ॒श॒तीरि॑व मा॒तरः॑।
तस्मा॒ अरं॑ङ्गमाम वो॒ यस्य॒ क्षया॑य॒ जिन्व॑थ।
आपो॑ ज॒नय॑था च नः।
पृ॒थि॒वी शा॒न्ता साऽग्निना॑ शा॒न्ता
 सा मे॑ शा॒न्ता शुचग्ं॑ शमयतु।
अ॒न्तरि॑क्षग्ं शा॒न्तं तद्वा॒युना॑ शा॒न्तं
 तन्मे॑ शा॒न्तग्ं शुचग्ं॑ शमयतु।
द्यौश्शा॒न्ता साऽऽदि॒त्येन॑ शा॒न्ता
 सा मे॑ शा॒न्ता शुचग्ं॑ शमयतु।
पृ॒थि॒वी शान्ति॑र॒न्तरि॑क्ष॒ग्ं॒
 शान्ति॒र्द्यौश्शान्ति॒र्दिश॒श्शान्ति॑
 रवान्तरदि॒शाश्शान्ति॑
 र॒ग्निश्शान्ति॑र्वा॒युश्शान्ति॑

राद्वित्यश्शान्तिश्चन्द्रमा
श्शान्तिर्नक्षत्राणि शान्ति
रापश्शान्तिरोषधयश्शान्तिर्वनस्पतय
श्शान्तिर्गौश्शान्तिरजा शान्तिरश्वश्शान्तिः
पुरुषश्शान्तिर्ब्रह्मश्शान्तिर्ब्राह्मण
श्शान्तिश्शान्तिरेव
शान्तिश्शान्तिर्मे अस्तु शान्तिः।
तयाहग्ं शान्त्या सर्वशान्त्या
मह्यं द्विपदे चतुष्पदे च
शान्तिं करोमि शान्तिर्मे अस्तु शान्तिः।
एह श्रीश्च ह्रीश्च धृतिश्च तपो मेधा
प्रतिष्ठा श्रद्धा सत्यं धर्मश्चैतानि
मोत्तिष्ठन्तमनूत्तिष्ठन्तु मा माग्ं
श्रीश्च ह्रीश्च धृतिश्च तपो मेधा प्रतिष्ठा
श्रद्धा सत्यं धर्मश्चैतानि मा मा हासिषुः।
उदायुषा स्वायुषोदोषधीनाग्ं
रसेनोत्पर्जन्यस्य
शुष्मेणोदस्थाममृताग्ं अनु।
तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्।
पश्येम शरदश्शतं जीवेम शरदश्शतं
नन्दाम शरदश्शतं मोदाम शरदश्शतं

भवा॑म श॒रद॑श्श॒तग्ं श्रृ॒णवा॑म श॒रद॑श्श॒तं
प्रब्र॑वाम श॒रद॑श्श॒तमजी॑तास्स्याम
श॒रद॑श्श॒तं ज्योक्च॒ सूर्यं॑ दृ॒शे।
य उद॑गान्महृ॒तोऽर्णवा॑द्वि॒भ्राज॑मानस्सरि॒रस्य॒
मध्या॒थ्सम॑ वृष॒भो लो॑हिता॒क्षस्सूर्यो॑
विप॒श्चिन्मन॑सा पुनातु।
ब्रह्म॑ण॒श्चोत॑न्यसि॒ ब्रह्म॑ण आ॒णीस्थो॒
ब्रह्म॑ण आ॒वप॑नमसि धारि॒तेयं पृ॑थि॒वी
ब्रह्म॑णा म॒ही धा॑रि॒तमे॑नेन म॒हद॒न्तरि॑क्षं॒
दिवं॑ दाधार पृथि॒वीग्ं सदे॑वा॒ं यद॒हं वेद॒
तद॒हं धा॑रयाणि॒ मा मद्वेदोऽधि॒ विस्र॑सत्।
मे॒धा॒म॒नी॒षे माऽऽवि॑शताग्ं स॒मीची॑
भू॒तस्य॒ भव्य॒स्याव॑रुद्ध्यै॒
सर्व॒मायु॑रयाणि॒ सर्व॒मायु॑रयाणि।
आ॒भिर्गी॒र्भिर्यदतो॑ न ऊ॒नमाप्या॑यय
हरिवो॒ वर्ध॑मानः।
य॒दा स्तो॒तृभ्यो॒ महि॑ गो॒त्रारु॒जासि॑
भूयिष्ठ॒भाजो॒ अध॑ ते स्याम।
ब्रह्म॒ प्राव॑ादिष्म॒ तन्नो॒ मा हा॑सीत्।
ओं शान्ति॒श्शान्ति॒श्शान्तिः॑॥

**॥ इति घोषशान्तिः समाप्तः॥**